# Saptamatrikritam Devi Stotram

# सप्तमातृकृतं देवीस्तोत्रम्

## Document Information

Text title : Saptamatrikritam Devi Stotram

File name : saptamAtRRikRRitaMdevIstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | mAheshvarakhaNDa | aruNAkhaNDa | uttarakhaNDa | adhyAya 19/53-60||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2025

*sanskritdocuments.org*

# सप्तमातृकृतं देवीस्तोत्रम्

(सप्तमातर ऊचुः ।)
देवीं तां तुष्टुवुर्दुर्गामेवं सप्तापि मातरः ॥ ५२॥

योगनिद्रेति रूपेण विष्णोर्नयनपद्मयोः ।
त्वया निलीयते देवि मधुकार्येव लीलया ॥ ५३॥

अमूमुहस्त्वं न तथा मातश्च मधुकैटभौ ।
कथं जघान तौ विष्णुस्तयोरेवाभ्यनुज्ञया ॥ ५४॥

त्वं कौशिकी न चेज्जाता मृत्युः शुम्भनिशम्भयोः ।
कथं तु लोकपालानामैश्वर्यं देवि एष्यति ॥ ५५॥

विन्ध्यवासिनि विन्ध्येन किमवन्ध्यं कृतं तपः ।
यत्र मैत्री किरातीभिरपि लभ्या त्वया समम् ॥ ५६॥

कापिशायनमापीतं धनदोपायनीकृतम् ।
त्वयाम्ब नीतं दैत्यानां रसैर्नियतमानवैः ॥ ५७॥

ब्रह्मणः सृष्टिशक्तिस्त्वं स्थितिशक्तिर्मधुद्विषः ।
अम्ब संहारशक्तिश्च रुद्रस्यापि प्रगल्भसे ॥ ५८॥

यशोदानन्दजाता त्वमेकानंशेति नामतः ।
कंसाद्यसुरसंहारे हरेः साह्यं करिष्यसि ॥ ५९॥

त्वं विद्या त्वं महामाया त्वं लक्ष्मीस्त्वं सरस्वती ।
त्वं देवी पार्वतीशापि दुर्गे किं वा न जायसे ॥ ३.२.१९.६०॥

इति श्रीस्कन्दपुराणे माहेश्वरखण्डेऽरुणाचलमाहात्म्ये उत्तरार्धे एकोनविंशाध्यायान्तर्गतं सप्तमातृकृतं देवीस्तोत्रं समाप्तम् ।

स्कन्दपुराण । माहेश्वरखण्ड । अरुणाखण्ड । उत्तरखण्ड । अध्याय १९/५३-६० ॥

skandapurANa . mAheshvarakhaNDa . aruNAkhaNDa . uttarakhaNDa . adhyAya 19/53-60..

Proofread by PSA Easwaran

*Saptamatrikritam Devi Stotram*

pdf was typeset on April 27, 2025

Please send corrections to *sanskrit@cheerful.com*